# भारतमुद्रा।



(५२त्तमराज्यस्तरीयस्कूल्–कलोत्सवस्य विशिष्टसम्पुटः – २०–०१–२०१२)

## संस्कृतपण्डितसमादरणं चर्चागोष्ठी च सुसम्पन्ना



केरलसाहित्याक्कादम्याः मुख्यसभाङ्गणे संस्कृतजन–महासमुद्रसान्निध्ये राज्यस्तरीयसंस्कृतोत्सवस्याङ्गत्वेन चर्चागोष्ठी पण्डितसमादरणञ्च सम्पन्नम्।




पण्डितसमादरणसमारोहं समुद्घाटयन् नियमसभा–सामाजिकः निरवदद् यद् ”अद्य मानविकतामूल्यस्य

च्युतेः मुख्यो हेतुः संस्कृतविद्याभ्यासस्य अपचय एव। यद्यपि भूरिणामपि विश्वस्तरीयविज्ञानशाखानां भण्डाकारोऽस्ति संस्कृतं, तथापि केरलेषु भाषेयं यथार्हं नैव परिगण्यत इति खेदास्पदं कार्यम्।

समारोहस्य मुख्यप्रभाषकः वेदान्तबिरुदधारी ओणम्पल्ली मुहम्मद् फैस् महोदयः निरुक्तवान् यत् – भारतमिदं महाराज्यं समेषां धर्माणां तथा विविधानां दर्शनानां प्ररोहणे फलभूयिष्टं मृदभवत्। तत्र केवलम् एक एव हेतुः संस्कृतभाषायाः प्रभावः।



राष्ट्रेऽस्मिन्निदानीं प्रवर्धमानानां मिथ्याधारणानां परिहाराय संस्कृतस्थदर्शनानां स्वांशीकरणमेव एकमात्रोपायः– इति।

समारोहे श्रीयुताः चन्द्रशेखरवारियरः, अवणप्परम्प् महेश्वरन् नम्पूतिरिः, डो. इ. पी अरविन्दपिषारोटि महोदयाः भूतपूर्वविद्याभ्यास–निर्देशकेन चित्रन् नम्पूतिरिप्पट् महोदयेन विशिष्टफलकेन अङ्गवस्त्रार्पणेन च समाद्रियन्त।

“आनुकालिककेरलविज्ञानशाखाभ्यः संस्कृतस्य योगदानं" इतीदं विषयं चर्चार्थमवातारयत् श्रीयुतः सी. कृष्णन् नम्पूतिरिः। चर्चायां

सजीवं भागं गृहीत्वा डो. एम्. वि. नटेशः, अशोकन् पुरनाट्टुकरा, वेणु कक्कट्टिल्, इत्यादयः शास्त्रियविज्ञानप्रसारणेन सह मानवीयताविकासायापि श्रमः कार्यः, यदर्थं संस्कृतविद्याभ्यासः मुख्यः उपाधिः अस्तीति सर्वैः ऐकमत्येन उद्घुष्टम्।




## हा हन्त! एष्याजालम् !।

एष्याजालः (Asianet) इति नाम्ना प्रथितं दृश्यमाध्यमं संस्कृतोत्सवं अवागणयत्। संस्कृतोत्सवे गानालापस्पर्धायां प्रथमश्रेण्यां प्रथमस्थानं लब्धवती छात्री, समायोजकानां विज्ञापनमनुसृत्य छायाग्रहणार्थं माध्यमकार्यालयान् प्राप्तवती। तत्र एष्यानेट् माध्यमस्य प्रवर्तकः तां निशितमेवमुक्तवान् – "संस्कृतं न केनापि परिगण्यते। अतः चित्रादिकं नैव गृह्यते" इति।

उत्तरश्रवणेन खिन्ना स्विन्ना च सा रुदित्वा स्वकीयं खेदमस्मान् अभ्यवदत्। दूरवाण्या सम्पर्कः कृतोऽपि एष्याजालचालकानां मनः तथैवास्ति। दृश्यकुल्यायाः (Visual Channel) अस्याः निरीक्षकाः इतः परं तां त्यजन्तु इत्येव संस्कृतभक्तानां प्रार्थना। एवं कृते सति प्रेक्षकाणां संख्यादारिद्र्यात् प्रकटनदातारः(Advertisors) तां प्रति विमुखाः भविष्यन्ति।



एकस्मिन्नेव समये २००० जनेभ्यः भक्षणं वितरितुं व्यवस्थापिते भोजनालये मध्याह्नसमयस्य बुभुक्षितानां श्रेणी।

# शिक्षामन्त्रिणा प्रोद्घाटिता अरबिक् चर्चा।

अरबी साहित्योत्सवाङ्गत्वेन समायोजितां चर्चागोष्ठीं समुद्घाटयन् विद्याभ्यासमन्त्री अवदत् यद् योग्यतावन्तः सर्वे अध्यापकाः भाषा–भाषेतरव्यवस्थां विना प्राध्यापकाः भवितुमर्हन्त्येव। तदर्थम्




आवश्यकनियमाः झटित्येव प्रसारिताः भविष्यन्ति।

सि.एम्.एस्. उच्चतरविद्यालयप्राङ्गणे प्रवर्तमाने अरबी–उत्सवे जनबाहुल्येन समायोजकानां सामर्थ्यात् आनन्दतुन्दिला समभवन् प्रेक्षकाः। आरबीयाध्यापकसङ्घस्य नेतुः श्री इमामुद्दीन् महोदयस्य

तादृशानितरेषां पूर्विकाणामिदानीन्तनानाञ्च सान्निध्यम् उत्सवममुं महोत्सवमकारयत्।




"केरलसांस्कृतीयवाङ्मयस्य अद्वितीया स्पर्धा अक्षरश्लोकस्पर्धादृश्यम्।"

(पूर्वस्पर्धालुना उच्चरितश्लोकस्य द्वितीयपादस्य आद्याक्षरा–दारभमाणः श्लोकः अनूच्चारकेण श्लोक्यम्।)